## सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे। (१५४/२८११)

लिङ् इत्येव। सम्भावनम् क्रियासु [1]योग्यताध्यवसानम्, [2]शक्तिश्रद्धानम्। तदिदानीम् [3]अलमर्थेन विशेष्यते। [4]तच्चेत् सम्भावनं पर्याप्तमवितथं भवति। सिद्धाप्रयोगे इत्यलमो विशेषणम्। सिद्धश्चेदलमोऽप्रयोगः। क्व चासौ सिद्धः[5]? यत्र गम्यते [6]चार्थो न चासौ[7] प्रयुज्यते। [8]तदीदृशे सम्भावनोपाधिकेऽर्थे वर्तमानाद् धातोः लिङ् प्रत्ययो भवति। सर्वलकाराणामपवादः। अपि पर्वतं शिरसा भिन्द्यात्। अपि द्रोणपाकं भुञ्जीत। अलम् इति किम्? [9]विदेशस्थायी देवदत्तः प्रायेण गमिष्यति ग्रामम्। सिद्धाप्रयोगे इति किम्? अलं देवदत्तो हस्तिनं हनिष्यति। क्रियातिपत्तौ भूते [10]भविष्यति च नित्यं लृङ् भवति॥

## विभाषा धातौ सम्भावनवचनेऽयदि। (१५५/२८१२)

[11]सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे (३.३.१५४/२८११) इति सर्वमनुवर्तते। सम्भावनमुच्यते येन [12]स सम्भावनवचनः। [13]सम्भावनवचने धातावुपपदे यच्छब्दवर्जिते[14] धातोर्विभाषा लिङ् भवति। पूर्वेण [15]नित्यप्राप्तौ विकल्पार्थं वचनम्। सम्भावयामि भुञ्जीत भवान्, सम्भावयामि भोक्ष्यते भवान्। अवकल्पयामि भुञ्जीत भवान्, भोक्ष्यते भवान्। श्रद्दधे भुञ्जीत भवान्, भोक्ष्यते भवान्। अयदि इति किम्? सम्भावयामि [16]यद् भुञ्जीत भवान्॥

## हेतुहेतुमतोर्लिङ्। (१५६/२८१३)

हेतुः कारणम्। हेतुमत् फलम्। हेतुभूते [17]हेतुमति चार्थे वर्तमानाद् धातोः लिङ् प्रत्ययो भवति। [18]सर्वलकाराणामपवादः। दक्षिणेन चेद् यायान्न शकटं पर्याभवेत्। यदि कमलकमाह्वयेन्न शकटं पर्याभवेत्[19]। दक्षिणेन यानं हेतुः, अपर्याभवनं हेतुमत्। विभाषा चायमिष्यते भविष्यति [20]च काले, तेन लृडपि [21]भवति। दक्षिणेन चेद् यास्यति न शकटं पर्याभविष्यति। तत्र विभाषाग्रहणं तावदनन्तरमेवानुवर्तते। लिङ् इति वर्तमाने पुनर्लिङ्ग्रहणं कालविशेषप्रतिपत्त्यर्थम्। तेनेह न भवति, हन्तीति पलायते, वर्षतीति धावति। क्रियातिपत्तौ लृङ् भवति॥

## इच्छार्थेषु लिङ्लोटौ। (१५७/२८१४)

इच्छार्थेषु धातुषूपपदेषु धातोः लिङ्लोटौ प्रत्ययौ भवतः। सर्वलकाराणामपवादः। इच्छामि भुञ्जीत भवान्। इच्छामि भुङ्क्ताम् भवान्। [22]कामये। प्रार्थये[23]।

[३३२] कामप्रवेदन इति वक्तव्यम्। (म.भा. २.१६५)

इह मा भूत्, इच्छन् [24]करोति॥

---

1. योग्याध्यवसानम् ह. 2. शक्तौ श्रद्धानम् फ. 3. अलमर्थेन नास्ति ह. 4. पर्याप्त्या तच्चेत् संश्रद्धानम् ह, पर्याप्त्या फ. 5. अप्रयोगः इत्यधिकम् फ. 6. च शब्दः फ. 7. असौ नास्ति फ, प्रयुज्यते शब्दः ह. 8. तदीदृशसम्भावनार्थोपाधिकेऽर्थे ह. 9. निदेशस्थायी ह. 10. भविष्यति नास्ति फ. 11. वाक्यमिदं नास्ति फ.ह. 12. तत् सम्भावनवचनम् ह. फ. 13. सम्भावनावचने ह, तत्र इत्यधिकम् फ. 14. उपपदे इत्यधिकम् ह, धातोः नास्ति फ. 15. नित्ये प्राप्ते अनित्यार्थेन फ, नित्ये प्राप्ते वचनम् ह. 16. यदि ह. 17. हेतुमत्फलभूते फ, तत्फलभूते ह. 18. वाक्यमिदं नास्ति फ. 19. न भिन्द्यात् इत्यर्थः इत्यधिकम् अ. 20. च नास्ति फ. 21. भवति नास्ति फ. 22. एवम् इत्यधिकम् फ. 23. भुञ्जीत भवान् इत्यधिकम् फ, भुङ्क्ताम् भवान् इत्यधिकम् ह. 24. कटं इत्यधिकम् फ.